শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৩

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - ९३

*गुरुशिक्षावर्णनम्*

বন্ধুস্নেহং ৱিজহ্যাং তৱ হি করুণযা ত্বয্যুপাৱেশিতাত্মা
সর্ৱং ত্যক্তৱা চরেযং সকলমপি জগদ্বীক্ষ্য মাযাৱিলাসম্।
নানাত্বাদভ্রান্তিজন্যাত্ সতি খলু গুণদোষাৱবোধে ৱিধির্ৱা
ব্যাসেধো ৱা কথং তৌ ত্বযি নিহিতমতের্ৱীতৱৈষম্যবুদ্ধেঃ॥ ১ ॥

ক্ষুত্তৃষ্ণালোপমাত্রে সততকৃতধিযো জন্তৱঃ সন্ত্যনন্তা-
স্তেভ্যো ৱিজ্ঞানৱত্ত্বাত্ পুরুষ ইহ ৱরস্তজ্জনির্দুর্লভৈৱ।
তত্রাপ্যাত্মাত্মনঃ স্যাতসুহৃদপি চ রিপুর্যস্ত্বযি ন্যস্তচেতা-
স্তাপোচ্ছিত্তেরুপাযং স্মরতি স হি সুহৃত্ স্বাত্মৱৈরী ততোন্যঃ॥ ২ ॥

ত্বতকারুণ্যে প্রৱৃত্তে ক ইৱ নহি গুরুর্লোকৱৃত্তেপি ভূমন
সর্ৱাক্রান্তাপি ভূমির্নহি চলতি ততসসতক্ষমাং শিক্ষযেযম্।
গৃহ্ণীযামীশ তত্তদ্বিষযপরিচযেপ্যপ্রসক্তিং সমীরাত
ব্যাপ্তত্বঞ্চাত্মনো মে গগনগুরুৱশাদ্ভাতু নির্লেপতা চ॥ ৩ ॥

স্বচ্ছঃ স্যাং পাৱনোহং মধুর উদকৱদ্বহ্নিৱন্মা স্ম গৃহ্ণাং
সর্ৱান্নীনোপি দোষং তরুষু তমিৱ মাং সর্ৱভূতেষৱৱেযাম্।
পুষ্টির্নষ্টিঃ কলানাং শশিন ইৱ তনোর্নাত্মনোস্তীতি ৱিদ্যাং
তোযাদিৱ্যস্তমার্তাণ্ডৱদপি চ তনুষৱেকতাং ত্বতপ্রসাদাত্॥ ৪ ॥

স্নেহাদব্যাধাত্তপুত্রপ্রণযমৃতকপোতাযিতো মা স্ম ভূৱং
প্রাপ্তং প্রাশ্নন্ সহেয ক্ষুধমপি শযুৱত্ সিন্ধুৱতস্যামগাধঃ।
মা পপ্তং যোষিদাদৌ শিখিনি শলভৱত্ ভৃঙ্গৱত্ সারভাগী
ভূযাসং কিন্তু তদ্বদ্ধনচযনৱশান্মাহমীশ প্রণেশম্॥ ৫ ॥

www.prapatti.com

মা বদধ্যাসং তৰুণ্যা গজ ইৰ ৰশযা নার্জযেযং ধনৌঘং
হর্তান্যস্তং হি মাধৰীহৰ ইৰ মৃগৰন্মা মুহং গ্ৰাম্যগীতৈঃ।
নাত্যাসজ্জেয ভোজ্যে ঝষ ইৰ বডিশে পিঙ্গলাৰন্নিৰাশঃ
সুপ্যাং ভর্তৰ্য্যযোগাত্ কুৰৰ ইৰ ৰিভো সামিষোন্যৈর্ন হন্যৈ॥ ৬ ॥

ৰর্তেয ত্যক্তমানঃ সুখমতিশিশুৰন্নিসসহাযশ্চৰেযং
কন্যাযা একশেষো ৰলয ইৰ ৰিভো ৰর্জিতান্যোন্যঘোষঃ।
ত্বচ্চিত্তো নাৰবুদ্ধ্যৈ পৰমিষুকৃদিৰ ক্ষ্মাভৃদাযানঘোষং
গেহেষৰন্যপ্ৰণীতেষৰহিৰিৰ নিৰসান্যুন্দুৰোর্মন্দিৰেষু॥ ৭ ॥

ত্বয্যেৰ ত্বতকৃতং ত্বং ক্ষপযসি জগদিত্যূর্ণনাভাত্ প্ৰতীযাং
ত্বচ্চিন্তা ত্বতস্বৰূপং কুৰুত ইতি দৃঢং শিক্ষযে পেশকাৰাত্।
ৰিডভস্মাত্মা চ দেহো ভৰতি গুৰুৰৰো যো ৰিৰেকং ৰিৰক্তিং
ধত্তে সঞ্চিন্ত্যমানো মম তু বহুৰুজাপীডিতোযং ৰিশেষাত্॥ ৮ ॥

হী হী মে দেহমোহং ত্যজ পৰনপুৰাধীশ যতপ্ৰেমহেতো-
র্গেহে ৰিত্তে কলত্ৰাদিষু চ ৰিৰশিতাস্তৰতপদং ৰিস্মৰন্তি।
সোযং ৰহ্নেশ্শুনো ৰা পৰমিহ পৰতসসাম্প্ৰতং চাক্ষিকর্ণ-
ত্বগজিহ্বাদ্যা ৰিকর্ষন্ত্যৰশমত ইতঃ কোপি ন ত্বতপদাব্জে॥ ৯ ॥

দুৰ্ৰাৰো দেহমোহো যদি পুনৰধুনা তর্হি নিশশেষৰোগান
হৃত্বা ভক্তিং দ্ৰঢিষ্ঠাং কুৰু তৰ পদপঙ্কেৰুহে পঙ্কজাক্ষ।
নূনং নানাভৰান্তে সমধিগতমিমং মুক্তিদং ৰিপ্ৰদেহং
ক্ষুদ্ৰে হা হন্ত মা মা ক্ষিপ ৰিষযৰসে পাহি মাং মাৰুতেশ॥ ১০ ॥

**********

www.prapatti.com